# Shri Krishnanamashtakam

# શ્રીકૃષ્ણનામાષ્ટકમ્

## Document Information

Text title : kRRiShNanAmAShTakam

File name : kRRiShNanAmAShTakam.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, aShTaka

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

Shri Krishnanamashtakam

# શ્રીકૃષ્ણનામાષ્ટકમ્

નિખિલશ્રુતિમૌલિરત્નમાલા
    દ્યુતિનીરાજિતપાદપઙ્કજાન્ત ।
અયિ મુક્તકુલૈરુપાસ્યમાનં
    પરિતસ્ત્વાં હરિનામ સંશ્રયામિ ॥ ૧॥

જય નામધેય મુનિવૃન્દગેય હે
    જનરઞ્જનાય પરમાક્ષરાકૃતે ।
ત્વમનાદરાદપિ મનાગ્ ઉદીરિતં
    નિખિલોગ્રતાપપટલીં વિલુમ્પસિ ॥ ૨॥

યદાભાસોઽપ્યુદ્યન્ કવલિતભવધ્વાન્તવિભવો
    દૃશં તત્ત્વાન્ધાનામપિ દિશતિ ભક્તિપ્રણયિનીમ્ ।
જનસ્તસ્યોદાત્તં જગતિ ભગવન્નામતરણે
    કૃતી તે નિર્વક્તું ક ઇહ મહિમાનં પ્રભવતિ ॥ ૩॥

યદ્ બ્રહ્મસાક્ષાત્કૃતિનિષ્ઠયાપિ
    વિનાશમાયાતિ વિના ન ભોગૈઃ ।
અપૈતિ નામ સ્ફુરણેન તત્ તે
    પ્રારબ્ધકર્મેતિ વિરૌતિ વેદઃ ॥ ૪॥

અઘદમનયશોદાનન્દનૌ નન્દસૂનો
    કમલનયનગોપીચન્દ્રવૃન્દાવનેન્દ્રાઃ ।
પ્રણતકરુણકૃષ્ણાવિત્યનેકસ્વરૂપે
    ત્વયિ મમ રતિરુચ્ચૈર્વર્ધતાં નામધેય ॥ ૫॥

વાચ્યો વાચકમિત્યુદેતિ ભવતો નામ સ્વરૂપદ્વયં
    પૂર્વસ્માત્ પરમેવ હન્ત કરુણા તત્રાપિ જાનીમહે ।
યસ્તસ્મિન્ વિહિતાપરાધનિવહઃ પ્રાણી સમન્તાદ્ ભવેદ્
    આસ્યેનેદમુપાસ્ય સોઽપિ હિ સદાનન્દામ્બુધૌ મજ્જતિ ॥ ૬॥

સૂદિતાશ્રિતજનાર્તિરાશયે
    રમ્યચિદ્ઘનસુખસ્વરૂપિણે ।
નામ ગોકુલમહોત્સવાય તે
    કૃષ્ણપૂર્ણવપુષે નમો નમઃ ॥ ૭॥

નારદવીણોજ્જીવનસુધોર્મિનિર્યાસમાધુરીપૂર ।
ત્વં કૃષ્ણનામ કામં સ્ફુર મે રસને રસેન સદા ॥ ૮॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીનામાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Krishnanamashtakam*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*